व्याःपापिन् पश्यतोमे रघुतिलकवधूं चोरयित्वाप्रयातुं सीतांगीतांगुरुस्वामिव गिरिशगिरःशायिनीमुद्यतोसि । अभिभित्वाशिरांसि प्रखरनखमुखैर्दीप्तचूडा-मणीनि त्वा मद्याहं गरुत्मानुरगमिव सुधाहारिणं संहरामि ॥ १६७ ॥

Digitized by Google

अथ जटायुरावणयोर्युद्धं ।

सूत्र । यत्तं विक्षिपति ध्वजं विभजतेमूर्द्धातिमद्धंयुगं चक्रं चूर्णयति क्षिपे-
ति तुरगान् रक्षःपतेःपक्षिराट । रक्षांगर्ज्जति तर्ज्जयत्यभिभवत्याक्षिपते ताड्य-
त्याकर्षत्यपकर्षति प्रचलयत्यच्चुत्युदच्चत्यपि ॥ १६८ ॥

मुद्यत्तेोधृतचपेट क्षिप्तातलेनरक्षः पिपेषगगने स्फुटपक्षिराजं । ईषत्-
स्थितासुरपतद्भुवि राम राम रामेति मन्त्रमनिशंनिगदन्जटायुः ॥ १६९ ॥

अथक्षतरथभङ्गं पक्षिराजं निहत्यक्षितिगतमवलोक्य स्वासमाधावधेर्यं ।
जनकनृपतिपुत्रीं क्षिप्रमादाय रक्षांसरभसमुपदध्रे शोककेलीवनान्ते ॥ १७० ॥

अथ पतितजटायुखेदः ।

नमेत्रीनिर्ऋता दशरथनृपेकार्यविषया न वैदेही भाता नच रक्षतेोराक्ष-
सपतिः । न रामस्यास्ये दुर्नयनविषये भूरक्षतिनेा जटायेर्जन्मेदं वितथमभव-
द्भागरहितं ॥ १७१ ॥

अथ पथिरामलक्ष्मणयोरवस्थिति प्रत्युक्तौ ।

एकाकिनी मुटजसीम्नि विहाय सीतां किंवत्स मत्सविध माकुल मागतेा-
सि । अत्रागते चिरयतित्वयिवीर देव्यामवस्थितः कटुकदुक्ति कदर्थितेाहं ॥ १७२ ॥

सूत्र । वाक्येनैकेनाद्भुतं तंनिहत्य मारीचाख्यं यातुधानं जवेन । सीता-
शून्यां पर्णशालां विलोक्य किं किं वृत्तं तदा राघवस्य ॥ १७३ ॥

रामः । मायाकुरङ्गं विनिहत्य बाणै र्भ्रात्रासहागत्यच पर्णशालां । कोऽ
यं तत्र समीक्ष्यतूर्णं द्रष्टुं चतुर्थं न शशाकरामः ॥ १७४ ॥ इतिसर्वेनिष्क्रान्ताः ।

इति तृतीयोऽङ्कः ।

Digitized by Google

अथ चतुर्थोऽङ्कः ॥

रामःप्रविशति ।

अथ रामविलापः ।

बहिरपिनपदानां पंक्तिरन्तर्नकाचित् किमिदमिहनसीता पर्णशाला किमन्या । अहमपि किमनाहं सर्व्वथा राघवस्येत्यहमपिनहिसोढा धन्त सीता वियोगं ॥ १७५ ॥

हापर्वशाखाकुरवासयष्टे हाभूतलाविष्कृत चन्द्रलेखे । मज्जीवना मामव-लम्बशाखे वैदेहि वैदेहि कुतोगतासि ॥ १७६ ॥

सूच । सभूरजोरञ्जित सर्व्वकायो बभौ विभुर्मन्यु विदीर्णचेताः । योषि-द्वियोगानलदह्यमानः स्वकान्त मार्गिकुरुयतीवभूमिः ॥ १७७ ॥

अथावसरे मुनिजनागमनं ।

मुनि । एकदैवतुरामेण स्वप्नमर्थं चतुरुयं । राज्यनाशो वनेवासोहृता-सीता मृतःपिता ॥ १७८ ॥

असम्भवं हेममृगस्यजन्म तथापिरामो लुलुभे मृगाय । प्रायःसमासन्न-विपत्तिकाले धियोहिपुंसां मलिनीभवन्ति ॥ १७९ ॥

कर्म्मणावाध्यतेबुद्धि र्बुद्ध्याकर्म्म नबाध्यते । सुबुद्धिरपियद्रामो हेमंहरि-णमन्वगात् ॥ १८० ॥

राज्याङ्गभ्रयता वनंगमयता घोरैः क्षियामाचरैः क्लैरं कारयता मतिं हत-

यया मायामृगछद्मना । दाराञ्हारयता वनेभ्रमयता नानावनाचीतचं रामस्यापि क्षणं ग्रठेनविधिना दुःखातिदुःखंमहत् ॥ १८१ ॥

उत्थायरामः ।

राम । हावल्लभे जनकवंशज वैजयन्ति हामदिलोचन चकोर नवेन्दुलेखे । इत्थंस्फुटं बडविलप्य विलप्य रामस्तामेव पर्णकुटिं परितश्चचार ॥ १८२ ॥

पुनःपर्णशालां विलोक्यरामः ।

आलिङ्गिताच सरसीरुहकोरकाक्षीपीतोधरेच मधुरो विधुमच्छलेन । दत्तावतार मकरन्द विमर्दितानि पुष्पाण्यमूनि दयिते क्षमतासि सुभ्रु ॥१८३॥

अथ गोदावरीतीरे सीताम्बे बडे रामचरितं।

राम । हेगोदावरि रम्यवारि सुभगे दृष्टात्वया जानकी साहर्तुं क्रमचारिणि किं गतती याता विनोदायवा । इत्येवं प्रतिपादपं प्रतिगिरं प्रत्यापगं प्रत्यगं प्रत्येवं प्रतिवर्हिणं तत इतस्तांयाचते मैथिलीं ॥ १८४ ॥

भो भो वृक्षाः पर्वतस्था बडकुसुमयुता वायुना घूर्णमाना रामोहं त्वाकुक्षाता दशरथ तनयः पृच्छते शोकदग्धः । विम्बोष्ठी चारुनेत्रा गजपतिगमना दीर्घवेणीसुमध्या हासीता वेनगीता ममहृदयगता वेनवाकुभहृष्टा ॥ १८५ ॥

सारेवातटिनी तदेवविपिनं सैवाग्निकुण्डस्थली सोयं भूमिधरः सएवमलयः प्रोद्भूत मन्दानिलः । तान्येतानि सरांसि सन्ति विमलान्युत्फुल्ल वल्लीवह इन्दाणीहनभार मन्दगमना नाद्योद्यतेजानकी ॥ १८६ ॥

सूत्र । गाहं गाहं गहुरे कानने तां दर्शंदर्शं दर्शंवल्लीं मतल्लीं । हारं हारं भूधरं तान्धकान्तां रामःकान्तामन्विचारी मरोदीत् ॥ १८७ ॥

Digitized by Google

अथ सीताया मरुव्यायां रामः ।

मध्यं केशरिभिः स्मितश्च कुसुमै र्नेत्रं कुरङ्गीगणैः कान्तिश्चम्पककुट्टनैः कलरुतं हाहाहतं कोकिलैः । वल्लीभिर्ललितंगतं करिवरैरित्थं विभज्याङ्गसा कान्तारैः सकलै र्विलास पटुभि र्नीतासि किं मैथिलि ॥ १८८ ॥

सीताया नूपुरं प्राप्य रामः ।

चपुर्मेप्रीणयत्येतत्सीताया इव नूपुरं । अवधारय सौमित्रे भूषणान्तर-मन्यतः ॥ १८९ ॥

लक्ष्मणः । नाहं जानामि केयूरे नाहं जानामि कुण्डले । नूपुरावेव जा-नामिनित्यं पादाभिवन्दनात् ॥ १९० ॥

ततः कियद्दूरंगत्वापतित सीतोत्तरीय प्राप्तोरामः ।

धूते पद्मप्रणयकेलिषु कण्ठपाशः क्रीडापरिश्रमहरं व्यजनंरतान्ते । शय्यानिशीथ कलहे हरिणेक्षणायाःप्राप्तंमया विधिवशादिदमुत्तरीयं ॥ १९१ ॥

ततश्चन्द्रं दृष्ट्वा ।

रामलक्ष्मणयोरुक्ति प्रत्युक्ती ।

सौमित्रे ननुसेव्यतां तरुतलं चण्डांशुरुज्जृम्भते चण्डांशोर्निशिकाकथा रघु-पते चन्द्रोय मुन्मीलति । वत्सैतद्दिदितं कथंनुभवता धत्तेकुरङ्ग यतः त्रासि प्रे-यसि हाकुरङ्गनयने चन्द्रानने जानकि ॥ १९२ ॥

Digitized by Google

ततश्चन्द्रप्रतिरामः।

शीतरश्मिरसि चन्द्रमांकथं तापयस्यनलगर्भमयूखैः। त्वां ग्रहेव ग्रसधा विभज्येयं जानकी सुखसमोयदि नस्यात्॥ १९३॥

अथ स्मृति विभ्रमे राम चन्द्रयोर्वन्हि प्रत्युक्तौ।

यथा। केयूरं रघुनाथ नाथ किमिदं भृत्योस्मि तेचक्षमः कोहं वत्सवदाक्ष देवभगवानार्य्यो भवान्राघवः। किंकुर्म्मो विजनेवने ततहतो देवीसमन्वेष्यते कादेवी जनकाधिराज तनया हाहाप्रिये जानकि॥ १९४॥

अथ रामानुस्मरणं।

हारेणारोपितः कण्ठे मया विश्लेषभीरुया। इदानी मावयोर्मध्ये सरित्सागर भूधराः॥ १९५॥

सोढस्तात वियोगः सोढोराक्ष्य वियोगोपि। सोढो वनेचवासः सोढुं नभवामि जानकी विरहं॥ १९६॥

इयंगेहे लक्ष्मीरियममृत वर्त्तिर्नयनयो रसावस्याः स्पर्शोवपुषि बहुचन्दनरसः। इमौबाहूकण्ठे सरसमृणालौ मौक्तिक सरः किमस्यान प्रेयोवद परमसह्यस्तु विरहः॥ १९७॥

वासिवात यतःक्रान्तां तांस्पृष्ट्वा मामपिस्पृश। रक्षेत्थो मां त्वया मान्द्य मक्षमेतेन जीवितु॥ १९८॥

तदियोग समुत्थेन तचिन्ता विपुलार्चिषा। रामन्दिवंशरीरं मे दह्यते मदनाग्निना॥ १९९॥

Digitized by Google

वायुर्दक्षिणतो वनानि पुरतो भृङ्गध्वनिर्वामतः पश्चाद्दुःसह चक्रवाकरुदितं चोर्द्धं सुधादीधितिः । इत्थं दुःसह पश्चताप सहिते मध्येमया ध्यायताने-त्यन्ते कतिवा प्रजागर भवैरत्यन्त दीर्घाःक्षपाः ॥ २०० ॥

चन्द्रस्त्वङ्ग करायते मृदुगति र्वंतोपि वज्रायते मालासूचि कुलायते मलयजालेपः स्फुलिङ्गायते । आलोकक्षितिमिरायते विधिवशात्प्राप्तोपि भारायते हा हन्त प्रमदा वियोग समयःसंहार कालायते ॥ २०१ ॥

रे रे निर्दय दुर्निवारमदन प्रोत्फुल्लपद्मे रुहान् बाणान् संवृणु संवृणु त्यज धनुः किं पौरुषं मांप्रति । कान्तायास्तु वियोग जातऋतभुग्ज्वालाप्रदग्धं वपुः प्राणांमृतमारके नहिपरोधर्म्मः प्रयुक्तोबुधैः ॥ २०२ ॥

आपुङ्खाग्रममीश्वरामनसि मेमग्नासमं पश्चते निर्दग्धं विरहाग्निना वपुरिदं तेरेव सार्द्धं मम । तत्कन्दर्प निरायुधोसि भवताजेतुं नशक्यःपरो दुःखी स्यःमह मेकएवसकलो लोकः सुखी जीवतु ॥ २०३ ॥

एवं दैवादस्तं गते मार्त्तण्ड मण्डले प्रचण्डमार्त्तण्ड मिवोदयन्त मचण्डरश्मिमन्तश्चन्द्रमण्डलमवलोक्य लक्ष्मणंप्रतिरामः ।

राम । सौमित्रेदावदह्नि स्तरुशिखरगतो वार्य्यतां निर्झरोदैः कावार्त्तादाव वह्नेरयमुदयगिरे रुज्जिहीतेहिमांशुः । धत्तेधूमं पुरस्तात्किमिति कथमयं नैषधूमोधरण्याच्छायेयं सङ्गता भूदयिधरणिसुते कुत्रसीतेस्थितासि ॥ २०४ ॥

यत्रयत्र न जगामराघव स्तत्रतत्र बुबुधेस मैथिलीं । यद्यदाश्रममगान्न भिक्षुक स्तत्तदर्थ परिपूर्ण मीक्षते ॥ २०५ ॥

सूत्र । विचिन्वता तेनविदेह पुत्रीं दृष्टोजटायुः श्वसितावशेषः । सीता हृताते दशकन्धरेण त्यावेद्य सद्यः सतनुं मुमोच ॥ २०६ ॥

Digitized by Google

श्रीरामः । श्रुत्वादशरथस्येनं मित्रं शत्रु निषूदनं । हाहातात क्वसिदं नाम रामः पक्षीन्द्रमब्रवीत् ॥ २०७ ॥

पारलौकिकं कृत्वा कृताञ्जलिः ।

राम । तातत्वं निजतेजसैव गमितः स्वर्गं व्रजस्वस्ति ते ब्रूमस्ते किमिमां वधू कृतिकृथां तातान्तिके मातृथाः । रामोहं यदितद्दिनैः कतिपयैर्वीडानमत्सन्धरः सार्धबन्धुजनैः सुरेन्द्र विजयी वक्षाक्षयं रावणः ॥ २०८ ॥

राज्यनाशो वनेवासो हृतासीता मृतःपिता । एकैकमपि यद्दुःखं समुन्मथितुमीश्वरं ॥ २०९ ॥

एकस्य दुःखस्य नयावदन्तं गच्छाम्यहं पारमिवार्णवस्य । तावद्द्वितीयं समुपस्थितं मे छिद्रेष्वनर्था बहुलीभवन्ति ॥ २१० ॥

युक्तमेवहि कैकय्या भरतस्याभिषेचनं । भार्यामपिन योरक्षेत्सकथं पालयेन्महीं ॥ २११ ॥

भद्रंकृतंहि तातेन येनाहं वनवासितः। एवापि छिन्नमेवुद्धिः कृमृगः कृद्धिरम्भयः ॥ २१२ ॥

सगरात्सागरःकीर्त्तिं गंङ्गाकीर्त्तिं भगीरथात्। अलाभ मीदृशीकीर्त्तिं रेकाभार्य्या न रक्षिता ॥ २१३ ॥

लभ्यमर्थं लभते मनुष्यो देवोपितं वारयितुं नशक्तः । अतो न शोचामि न विभ्रमेमे ललाटलेखा न पुनःप्रयाति ॥ २१४ ॥

विलपतिच ।

यापाणिग्रहणान्वितासुतरणौ तन्वीसुवंशोद्भवागौरी . स्वर्गसुखावहा

गुणवती नित्यं मनोहारिणी । साकेनापि हृतातया विरहिणो गन्तुंनशक्तावयं हे भिल्लो तवकामिनी नहिनहिप्राणप्रियायष्टिका ॥ २१५ ॥

अर्द्धंचेतसि जानकी परिपतत्यर्द्धंच लङ्केश्वर क्रूचार्द्धं मदनानलः दवल त्यर्द्धंच रोषानलः । इत्थं दुर्विधि सङ्गम व्यतिकरस्तुल्यद्वयोरंशयो रेकंवह्नि तुषाग्निदग्ध मपरं दग्धं करीषाग्निना ॥ २१६ ॥

नमेदुःखं प्रियादूरे नमेदुःखं हृतेतिसा । एतदेवहि शोचामि चापो यद-भिवर्त्तते ॥ २१७ ॥

श्रीरामोलक्ष्मणंप्रति ।

कोवेद हेमहरिण ग्रहणाय वत्स दूरंगते मयिहृता जनकात्मजेति । धी-डैव पीडयतिमां श्वसतोपि कुत्र च्चत्रस्यहि श्रुतिचरो वनितापहारः ॥ २१८॥

व्यसनं किमितोप्यास्ते ज्ञातस्याभ्युदयोमम । शरणं मरणंराज्यं मापुनर्म्म-रणान्नुतत् ॥ २१९ ॥

ततो भुजङ्गमवलोक्य द्रुतगमनंनाटयतिश्रीरामः ।

सूत्र । ततोरामस्तिरस्कृत्य पुरस्कृत्यच लक्ष्मणं । धन्योधन्य शरण्यस्त म-रण्यानींत्यगाद्वत ॥ २२० ॥

तत्रच कबन्धंदृष्ट्वा ।

लक्ष्मणः । त्रियोजनप्रसृत दोर्युगलेनमार्गं माक्रम्यकण्ठकुहरे कुरुतेदु-कोयं । सौमित्रियेति गदितः सकबन्ध कण्ठंचिच्छेद गर्भकदली मिवरामभद्रः ॥ ॥ २२१ ॥

सूत्र । पुनोरामशरेण दिव्य मगमद्दे हं कबन्धस्ततस्तद्वाक्याच्छ्रमणाश्रमे

हनुमता संयोज्य सीतापतिः । सीतोद्धार विधौसमं निजबलैः स्वीकृत्य सा-
हाय्यकं संप्राप्तः प्रतिपन्न वालिनिधनः सख्यं कपीन्द्राधिपात् ॥ २२२ ॥

ऋष्यमूकगिरौ रामो निःसहायः परिभ्रमन् । सख्यं समानदुःखेन सुग्री-
वेण सहाकरोत् ॥ २२३ ॥

पादाङ्गुष्ठेन दूरंधरक्षिधर गुरुं दुन्दुभेरस्थिकूटं क्षिप्तासक्षिप्रकारी
विषम विनिहितान् वज्रवत्सप्ततालान् । बाणेनैकेन शब्दप्रतिहत सकलश्रोत्र
गर्भान् विभेद्य प्रत्याप्तां वालिवेधे प्लवगबलपतेः प्रेषयामासरामः ॥ २२४ ॥

तालवेध समये रामो बाणंप्रति ।

भावोनिम्नं गुरिव कमनन्दन पादयोर्मे यद्यरम्यहं द्विजतिरक्षु तरोबहीनः ।
मान्यङ्काना सुचगनः शरसप्ततालान् भित्वा तदाप्रविश भूतलमप्यगाधं ॥२२५॥

एकेनैवशरेणगर्भकदली काण्डेष्विवानुक्रमात् विद्धेषु प्रथमेन दाशरथिना
तालेषु सप्तस्वपि । श्रेणीसप्तगजास्तु सप्तमुनयः सप्तापिसप्तार्णवास्तेषुःसप्तरसा-
तलान्युभयतः संख्यानसाम्यादिव ॥ २२६ ॥ निष्क्रान्ताः ।

एकांगे रङ्गस्थल कल्पनं ।

ततोवाली प्रविशति ।

सूत्र । श्रुत्वाहतान् समरमूर्ध्नि सुसप्ततालान् रामेषुदीन हृदयेनविनापि-
राधं । क्रोधानल ज्वलित हृत्कमलोथ वालीरङ्गावतारमगमद्गिरि गह्वरा-
त्यः ॥ २२७ ॥

Digitized by Google

अथ पर्वतगुहाकृतिः ।

ततस्तारा प्रविशति ।

सूत्र । ततस्तारा सहर्षमात्मगतं अद्यावश्यं श्रीरामचन्द्रचरण प्रसादान्निजवल्लभस्य चिरविरहिणोवक्षः पीठेलुठिष्यामि ॥ २२८ ॥

वीरसुग्रीवस्येत्याशिषः पठति ।

सूत्र । तारासंत्यक्तहारा गिरिशिखरवरव्यक्तधम्मिल्लधारा शोकाब्धि प्राप्त पारार्पितमदनशरा वीरसुग्रीवदाराः । नानानारीच धारानिजरमणरता तापिनो पापिनेत्थं प्राप्तान् मालावतीर्थाद्धरतु कलिकलाग्रालिनो वालिनोद्य ॥ २२९ ॥

श्रीराम मुद्दिश्यलक्ष्मणः ।

लक्ष्मणः । पृथिव्यां चतुरन्तायां नास्तिवाखि समोवली । वचसानेन लोकानां ग्रस्तित्वोमहेन्द्रजः ॥ २३० ॥

श्रीरामः सहासः । माभैषीर्मयि सामित्रे राघवेधिज्यधन्वनि । सतां देहं परित्यज्य निर्गच्छत्यसतोभयं ॥ २३१ ॥

वाली । गृह्णाम्यद्यं रघुराजपुत्र सुग्रामसूनं समरेवतीर्थं । जानीहिमां दुन्दुभि घातवज्रं नेष्यामिवां कालगृहाति थित्वं ॥ २३२ ॥

इत्युभौयुद्धायावतरतः ।

लक्ष्मणः सुग्रीवंप्रति ।

आर्य्यबाणेन भिन्नोयं वालीलुठति भूतले । तद्विपक्षस्यशिरसि पुष्पवृष्टिः सुरैःकृता ॥ २३३ ॥

Digitized by Google

वाली। सुग्रीवोपि क्षमः कर्त्तुं यत्कार्य्यं तवराघव। तदहं नक्षमःकस्मादपराधं विनाहृतः॥ २२४॥

रामः सक्रुद्धं।

शुद्धिर्भविष्यति पुरन्दरनन्दस्य मामेवचेदहह पातकिनं प्रजाप। सख्यं तिर्यगं निरपराधिनमाहनिष्यं जातः पुनर्ज्जनकजा विरहस्ततोमे॥ २२५॥

वाली। सोहं श्रीमतो रघुवंशावतं सख्यभवतः प्रसादान्महावीरोचितां गतिंगच्छामि। अयं वत्सेोऽङ्गद स्तवदासः परिपालनीय एवेति स्वर्गारोहणं नाटयति॥ २२६॥

सूत्र। सद्योनिर्भिद्यबाणैः समरभुवितदा वालिनं रामचन्द्र क्षिप्त्वा राज्यमदा विदमथस ददौ तत्र सुग्रीवहस्ते। वर्षाकालं घनाघीघनरवदचितोद्दाम दिक्चक्रगर्भं द्योनुन्वासं वितेने गिरिवरतटे माल्यवत्पर्व्वतस्य॥ २२७॥
निष्क्रान्ताः सर्वे।

इति चतुर्थोऽङ्कः।

अथ पञ्चमोऽङ्कः॥

माल्यवत्पर्वत कल्पनं।

तत्र रामलक्ष्मणौप्रविशतः।

सूत्र। रामाद्वलीयान्नपरोस्ति कश्चिदारावणाद्वारान्नपरोपमानः। तथापि रामः शरदं समीक्ष्य प्रतीक्षते सम्प्रति कालमेतं॥ २२८॥

तत्र माल्यवति वर्षासु विरही रामः।

यत्तन्नेत्रसमानकान्ति सलिलेमग्नं तदिन्दीवरं मेघैरन्तरितः प्रियेतवमुख-

Digitized by Google

च्छायानुकारीशशिः । येषित्वद्गमनानु कारिगतयस्तेराजहंसागतास्त्वत्सादृश्य विनोदमात्र मपिमे दैवंनहिच्छाग्यति ॥ २३९ ॥

स्वगतः । मन्दं मन्दयति गर्ज्जति वारिवाहो विद्युल्लता स्फुरति कूजति नीलकण्ठः । एतावतिव्यतिकरे रघुनन्दनस्य मूर्च्छैव केवलमभूदवलम्बनाय॥२४०॥

सीतायाः पूर्वावस्थां सूचयन् ।

रामः । पूर्वंपुरारिधनुषेनिनदेनहृतं रामंमुनिं रणमुखे परितोविलोक्य । शङ्काग्रगाङ्क परितप्त मुखारविन्दां तामेव मैथिलसुतां सततंस्मरामि ॥ २४१ ॥

स्निग्धश्यामलकान्ति लिप्तवियतो वेल्लद्बलाकाघना वाताःशीकरिणःपयोद गुरुदा मानन्दकेकाःकलाः । कामंसन्तुदृढं कठोरहृदयो रामोस्मि सर्व्वं सहो वेदेहीति कथं भविष्यति ह हा हा देवि धीराभव ॥ २४२ ॥

नीलेन्दीवरश्रिया नयनयोर्बन्धूकबुत्थाधरेपाणौ पद्मधियामधूककुसुम-भ्रान्त्या तयागण्डयोः । लीयन्ते कबरीषु बान्धवजन व्यामोह जातस्पृहा दुर्वा-रामधुपाः कियन्ति तरुणि स्थानानि रक्षिष्यसि ॥ २४३ ॥

रामोलक्ष्मणं प्रति ।

कार्य्येषु मन्त्री करणेषु दासी धर्म्मेषु पत्नी क्षमयाच धात्री । स्नेहेषु माता शयनेषु वेश्याररङ्गेसखीलक्ष्मण सा प्रियामे ॥ २४४ ॥

जीवातुः करुणामयस्य भवने सीमन्तिनीनां शिरोरत्नं मत्कुलदेवतामति निर्धिनेत्रात्मवःकामिनां । माद्यद्दन्ति नितान्त मन्दगमना सामेप्रिया जानकी सामित्रे शतपत्रशत्रुवदना कुत्राधुनासीदति ॥ २४५ ॥

Digitized by Google

रामः स्वात्मानंखगतमधिक्षिप्य ।

ईदृग्भानुकुले न कोपि भविता यस्याङ्गना कामुकैराक्रष्टेति परस्परं निगदतांश्रुत्वा मुनीनां मुखात् । सौमित्रे कुलपांशुलस्य चरितंश्रीरामचन्द्रस्य मे श्लक्ष्णार्द्धासनसंस्थितेन गुरुणा दुःखं परं धीयते ॥ २४६ ॥

अतीतायां प्रावृष्य गते सुग्रीवे रामचरितं ।

सूत्र । ततोरामो महातेजा लक्ष्मणं समुपाद्रवत् । सुग्रीवं प्रेषयामास स्कन्दावारं चकारसः ॥२४७ ॥

किष्किन्धाराज्यकल्पनं ।

सुग्रीवःप्रविशति ।

ततःकिष्किन्धागत्वालक्ष्मणः ।

श्रीमद्रामोवनस्थः कपिवर नगरं लक्ष्मणः प्रेषितोऽस्मि किष्किन्धा द्वारमागां रघुपतिवचनाल्लक्ष्मणस्तं जगाद । श्रुत्वा रामेति वाक्यं हसति कपिवरो रामनामा किमेतल्लक्ष्मात्वित्वा प्रमेयंसचकितमनसा विस्मितोसौप्रमत्तः॥२४८॥

लक्ष्मणःसुग्रीवंप्रमत्तंबुध्वाभीषयन्पुनर्बोधयति ।

आजावौग्रिकताडका हतवधो यत्रस्थरक्षाकरः सीतार्थे हरचापभङ्गमकरोच्छ्रेयोजितःभूषिनः । मारीचः खलुजीवयापि निहतो वाणीकृतः साम्प्रतं सोयं संप्रति राघवः कपिपते पञ्चाननोगर्ज्जति ॥ २४९ ॥

Digitized by Google

स्वस्ति श्रीरामपादाः कुशलिनः समाज्ञापयन्ति मां किं ।
इतिसुग्रीवोक्तिमाकर्ण्य पुनर्रामोब्रवः ।

रामः । नमेसंकुचितोबाणो येनवाली हतोमया । समये तिष्ठसुग्रीव मा वालिपथमन्वगाः ॥ २५० ॥ इति श्रीरामोक्तिंतथ्यमुखतःश्रुत्वा ।

श्रीरामान्तिकं समागत्यसुग्रीवः ।

यासौप्रकृतिरस्माकं वानराणांनरेश्वर । तामहंत्यक्तुमिच्छामि नसामां त्यक्तुमिच्छति ॥ २५१ ॥

पुनस्सानुनयं ।

दग्धंदग्धं त्यजति नपुनः काञ्चनं कान्तिवर्णं क्षिप्तंक्षिप्तं त्यजति नपुनः खादुतामिक्षुदण्डं । घृष्टं घृष्टं त्यजति न पुनश्चन्दनं चारुगन्धं प्राणान्तेपि प्रकृति विकृतिं जायते नोत्तमानां ॥ २५२ ॥

श्रीरामःप्रीत्यासुग्रीवं दृष्ट्वा ।

तातेनदत्तं भरतायराज्यं सीता हृता संप्रति रावणेन । विधिन्त्य रामोमनसाकुलेन विहायचापं रुदितुं प्रवृत्तः ॥ २५३ ॥

अत्रावसरे पुनःसधीरंसुग्रीवः ।

हते सप्त प्रयोधयो दग्धदिग्धः सप्तैव गोत्राधराः पृथ्व्यादीनि चतुर्दशैव भुवनान्येकं नभोमण्डलं । एतावत्परिमाणमल्प विषये वृक्षाग्रभाण्डोदरे कासौ यास्यति जानकी रघुपते किं कार्म्मुकं त्यज्यते ॥२५४॥

श्रीरामः । व्यसने महति प्राप्ते स्थिरैःस्थातुं न युज्यते । सङ्गां गिःपङ्गुमाखोक्य का हनूमन्तुमर्हति ॥ २५५ ॥

Digitized by Google

ततःप्रविशति जाम्बवान् ।

जाम्ब । यान्नेयः समानेयो योसौ ऋषिकुलोद्भवः । जङ्घाप्रख्यापनेयोग्रः प्रोक्तं जाम्बवता सता ॥ २५६ ॥

श्रीरामं प्रणम्य स्वपराक्रमंप्रकटीकरोति हनूमान् ।

किं प्राकारविशालतोरणवतीं लङ्कामिहैवानये किम्वा सैन्यमशङ्कितक्षसकलं तत्रैवसम्पातये । हेलोत्क्षोलित पर्वतोच्चशिखरैर्बध्नामिवातोयधिं देवाज्ञा पय किंकरोमिसकलं दोर्द्वन्द्वसाध्यं मम ॥ २५७ ॥

सोत्कण्ठंवदन्तं श्रीरामः समादिदेश ।

एतैर्मद्वचनमुद्गृह्य मारुते तव तेजसः । वृथा परिश्रमः कार्य्यः सीता जीवति वानवा ॥ २५८ ॥

पुनः सोत्कण्ठं वदन्तं हनूमन्तं पश्यन् श्रीरामः ।

कूर्म्मो मूलवदालवालवदयं नागो लतावद्दिशो मेघाः पल्लववत्प्रसूनफलवन्नक्षत्रसूर्येन्दवः । राजन् श्रोम मद्दीरहो ममतले श्रुत्वेतिगां मारुतेः सीताम्बे-षणमादिदेश सहसा रामः सहर्षःस्वयं ॥ २५९ ॥

सीताम्बेषणे तद्वृत्तमनभिजानतो हनुमतः परिदेवनं ।

कुत्रायोध्या क्वरामो दशरथवचनाद्वल्कलंमामाधत्ते सौमित्रीवनात्मा क्वनुकमयमृगः कुत्रसीतापहारः । सुग्रीवो राममित्रं जनकतनयान्वेषणे प्रेषितोहं येषोर्थोत्यसम्भावनीयस्तमपि घटयति क्रूरकर्मा विधाता ॥ २६० ॥

Digitized by Google

सूत्र । आरभ्भो विदधे महेन्द्र गिरिवरादम्भोनिधेर्लङ्घने वीरः श्रीरघुनाथ पाद रजसामुच्चैः स्मरन्मारुतिः । मूर्ध्ना जाम्बवतोभिवन्द्यचरणौ संस्मित्य सेनापतीनाश्वास्याशुमुखान्मुहुः प्रियतमान्प्रेक्ष्यन् समादिक्षच्च ॥ २६१ ॥

अथ सम्पातेरागमनं ।

सूत्र । सम्पातेरथदृष्ट्वयोजनशतात्पारेसमुद्रं पुरी लङ्का तत्र विदेहराज तनयेत्याकर्ण्यवायोः सुतः । अब्धिंलङ्घ्य शरीरदुस्तरतरं दृष्ट्वातथावर्द्धतेयावत्तेन तदीय केशर सटाटोपैर्नभोमण्डलं ॥ २६२ ॥

अथ सविलसदम्भस्तम्भिताद्धि प्रकाण्डं जलचर खरखेलत्कारवाचालिताण्डं । जलनिधिमभिवीक्ष्यङ्कितुं वायुपुत्रः खगपतिरिवचण्डोड्डीनमङ्कोचकार ॥२६३॥

कपीनां कटके घोरो जातः कलकलध्वनिः । याज्ञसेयः किमेकाकी गच्छेद्रावण सन्निधिं ॥ २६४ ॥

सुरसागमनं ।

सूत्र । प्रविश्य सुरसामुखान्तरमतोपि निष्क्रम्यच क्रमादुदितमम्बुधेस्तुहिन शैलजं मानयन् । निहत्य पथिरोधिकां नभसि सिंहिकां राक्षसीं विलंघ्य जलधिं ययौ पवनजः स लङ्कापुरीं ॥ २६५ ॥

लङ्कापुरीवर्णनं ।

सूत्र । गत्वालङ्कां निशायां पवनसुतवरोन्विष्य सीतां विनीतां गेहे गेहे प्रयत्नात्स्थल जल विटपे प्राविरे वृक्षमध्ये यत्रास्तेकुम्भकर्णः सुरजिनभवने कन्दरे गह्वरेवादृष्ट्वैदेहपुत्रीं चिरमनुसरन्चिन्तितोसौहनूमान् ॥ २६६ ॥

मातृभ्रातृकलत्र मंत्रि सचिव प्रख्यातजानां गृहं शैलस्यस्य मया निरूपित-

Digitized by Google

मपि श्रीसौधमेकैकशः। नानारूप रहस्यवीक्ष्य चरिता सीता न दृष्टा क्वचित् यद्वे सागरलङ्घने निपतिता लङ्केशशङ्काकुला ॥ २६७ ॥

संक्षिप्यायतनुं निरीक्ष्य सकलां लङ्कां शरच्चन्द्रिका निर्धौतांखिलसौध मण्डलमहो द्योतप्रसन्नान्तरां। दृष्ट्वा शोकवनेसराक्षसवधू संवेष्टितां जानकी-मारढो निभृतं स्थितः पवनजः कंकोलभूमीरुहं ॥ २६८ ॥

अथावसरे रावण प्रेषिता दूती सीतांप्रति।

आशाशङ्कशिखामणि प्रणयिनी शक्तिस्त्रिलोकीजये भक्तिर्भूतपतौ पि-नाकिनिपदं लङ्केति दिव्यापुरी। सम्भूति र्दृषिवाग्वधेच तदहो नेदृग्वरो लभ्यते स्याच्चेदेव न रावणः क्वनुपुनः सर्वत्र सर्वे गुणाः ॥ २६९ ॥

ततः स्वयमागत्यरावणः।

मुग्धेमैथिलिचन्द्रसुन्दरमुखिप्राणप्रदानौषधि प्राणानुज्झसृगाक्षि मन्मथ-नदिप्राणेश्वरित्याहिमां। रामस्त्वत्पति तेमुखं सुललितं वक्त्रैकमात्रेक्षतस्त्विष्या-मिदशानने बहुविधं मुह्यामहं मानिनि ॥ २७० ॥

अयिजनकतनूजे तापसेनत्वमेवं ननुकिमपिकुमंत्र ज्ञानिनाग्रिश्चितासि। नमदमरकिरीटोद्दृष्ट पादारविन्देप्रणतिमयितस्मिन्मर्त्यकोटेनुरागः ॥ २७१ ॥

सीतेत्वंपरिमुञ्च मानमधुना राजादारोगृह्यतां पद्मत्वंजनकोत्वया सुन-गरीं लङ्केश्वरंजीवय। एकोनाच शतैकमहिषी स्त्यक्ताचमन्दोदरीं सेवार्थं वि-नियुज्यतेचसकलं लङ्काधिपैर्ज्ञायतां ॥ २७२ ॥

सीतेपद्मशिरांसि यानिशिरसा धत्तेमहेशः स्वयं तानि त्वत्पदसंस्थितानि सुभगे कस्मादवज्ञायते। श्रुत्वैतत्परदार चम्पटवचः सीताहृतंरावणं निर्भाल्या नि शिरांसि मूर्तवधिक् सीतावचःपातुवः ॥ २७३ ॥

Digitized by Google

सीता । कारैकसि त्वमुचित चिरमेव यस्य निर्वापितो युधि स येन सहस्र बाहुः । तस्यापि रे पुरभिदो खिलमंच वेद मध्यापितस्य विजयी ममजीवनाथः ॥ २७४ ॥

सूत्र । व्यपसतदशमौलिर्जानकी पादपद्मे करधृत पदगुप्ते नास्यमालोक्य ऊचे । सुरपतिरपिपादे व्यापत इति योगान्नभवति तव तुष्टिर्वूहि किम्वाकरोमि ॥ २७५ ॥

पु० सूत्र । इत्थं निशम्यमधुरं नृपमाहवाक्यं नम्राननासपदि कोपवतीच सीता । श्रीरामबाहुहत रावणमस्तकेषुगृध्राःपदं दधति धेन्ममतुष्टियोगः ॥२७६॥

सीता । खद्यन्तरं वायसवैनतेययो र्यदन्तरं सिंह शृगालयोर्वने । खद्योत मार्तण्डकयोर्यदन्तरं तदन्तरं ते रघुनन्दनस्य ॥ २७७ ॥

रावण । सीते त्वं ननु कामिता मम भये नाद्येन वाक्येन तद्रामं द्रक्ष्यसि नरूप मचिरा दाकारपूर्वं वद । मानेनैव तनुत्वयं ननुगता सत्यं वचोह्याधिना श्रु वारावणसीतयोरिति वचो हास्यं हनूमान्यथौ ॥ २७८ ॥

त्रिजटाप्रविशति ।

सीतयाप्रतिषिद्धे रावणेचलिते त्रिजटासीतयोरहस्यं

सीता । पृच्छामि त्रिजटे सुखेन भवतीं कस्मादयं रावणोनीतिज्ञो नृपगोखरो हरति मामन्याङ्गनांकाननात् ॥ २७९ ॥

त्रिजटा । सीतेमन्मथ पुष्पसायकहते कानामनीतेः कथा यावत्कामशराहतो न पुरुषस्तावद्विशिष्यायते ॥ २८० ॥

अपिच । वज्रं जीर्यति तद्विशीर्यपिचहरे श्चक्रंचक्रं तथा दण्डः खण्डशतं यमस्यदलितः पाशोभवत्याशिनः । खड्गोरसितश्च मन्मथशरो मर्मोनभग्नस्ततः कः शान्तो सखि तस्य पुष्पमभवत्पुष्पायुधस्यायुधं ॥ २८१ ॥

Digitized by Google

अथ सीतादर्शने हनूमान्।

कान्तं पद्मपलाशाक्षि पीनश्रोणिपयोधरे। द्रुमस्य शाखामाश्रित्य तिष्ठसि त्वमनिन्दिते॥ २८२॥

किमर्थं तव नेत्राभ्यां वारि स्रवति शोकजं। पुण्डरीकपलाशाभ्यां विप्रकीर्णमिवोदकं॥ २८३॥

ततः सीतोक्तिः।

दुहिता जनकस्याहं विदेहस्य महात्मनः। सीतेति नामतश्चाहं भार्या रामस्य धीमतः॥ २८४॥

ईदृक्प्रभावो राम इति हनूमता पृष्टे।

सीता। रक्षितारघुवंशस्य जनकस्यच रक्षिता। रक्षितानीव लोकस्य धर्मस्य च परन्तपः॥ २८५॥

धनुर्वेदे च वेदे च वेदाङ्गेषु च निष्ठितः। विष्णुतुल्यो महाबाहुः कमलग्रीवो महामनाः॥ २८६॥

अथ हनूमान्मुद्रां दर्शयति।

सुवर्णस्य सुवर्णस्य सुवर्णस्य वरानने। प्रेषितं रामभद्रेण सुवर्णस्याङ्गुलीयकं॥ २८७॥

अथ सीता हनूमतो वक्त्रं प्रत्युक्ती।

मानुषोनसि लोभवान् वनमृगः कोनाम संप्रेषित स्त्वद्दैन्येन रघूत्तमस्य किं-

मिदं हस्तेस्थितं मुद्रिका । दत्ता तेन तदेव तां निजकरे बाढिंग्य आदायच प्रेम्णा मूर्ध्निससर्ज्जसभ्यगु दभूद्रात्रेषु रोमोद्गमः ॥ २८८ ॥

अथ सीता मोहः ।

सूत्र । मुद्राङ्गूरीयकमणौ प्रतिविम्बमासीद्रामस्य सादरमतीव विलोकयन्ती । मदुप एव किमभून्मम चिन्तयेति मीमांसया जनकराजसुता मुमोह ॥ २८९ ॥

पुनश्चेतना माधाद्य हनूमन्तमाहसीता ।

श्रीरामस्य तनुरीदृशी तनुतांगतेति ।

अथ हनुमान् ।

अनुदिनमनुरूपं त्वामनालोच्य सीतां प्रतिदिनमतिदीनं वीक्ष्य रामं विरामं । गिरिरपि विनयेसौ यत्तदा नद्विधाभूत्स्फुटितिरपि नविदीर्णा साद्दिसर्वं सद्दैव ॥ २९० ॥

समुद्रतरणे तव कीदृग्व्यवसाय इति प्रश्ने हनूमान् ।

तव प्रसादात् पवनप्रसादात्तवैव भर्तुश्चरण प्रसादात् । त्रिभिः प्रसादैरनुकूलितोहं व्यलङ्घयं गोष्पदवत्समुद्रं ॥ २९१ ॥

पुनर्हनूमन्तं सीताखावस्थांप्राह ।

सीता । चन्द्रोयम दिनेश दीधितिसम श्लोभं स्फुलिङ्गायते कर्पूरः कुलिशोयमं शुशिकलाः संत्रासमातन्वते । वायुर्बाडवविह्निवन्मलयजं दावाग्निवत्सामृतं सन्देशं नय राससन्निधिमितो यात्वांहुतंकारय ॥ २९२ ॥

Digitized by Google

ससन्देशं खामुपचक्रुपः ।

सीता । श्रीमद्राम पदारविन्द युगले दातव्य मेकं पत्रं सैन्येभोयुगलंपत्रे कपिवरायात्यन्तरम्यंपत्रं । एकत्वापिपत्रं ततस्तदनुजे देयं शुभाशीःयुतं पश्चात्सै-न्य निराकुलप्रकृतिना भोक्तव्य मेकंपत्रं ॥ २९३ ॥

ततो हनूमान् ।

सिन्दूरमिन्दुमुखि राम शिखीमुखानां सिंदुर्गमं कुचभिदां हरियूथपा-नां । देवं प्रसन्नमिव देवि तवाद्यसत्यं रक्षांसिकानि कुपितस्य च चक्षुरस्य ॥२९४॥

चक्राकारान्तराशोद्यान रचनं ।

सूत्र । सीतासम्भाषणान्ते पवनसुतवरोऽरण्यनिर्भेदु कामोद्याने मा-पिद्विजोऽभूदग्न विगलितखलूधी रक्तवर्णे । श्वेतोमुखोऽपि भूत्वा गत वन निकटोभावते मन्दमन्दं भ्रातर्युच्चात्प्रसादात्पतदमृत पत्रं किञ्चिदभ्यर्थयामि ॥ २९५ ॥ ततस्तेनिराकृतोवनंभंक्तुमारब्धवान् ।

रावणंप्रत्युद्यानपालाः ।

यत्रारण्येवहति सततंमारुतो मन्दमन्दं सूर्योयत्र प्रसतितपितुं तोयदस्तो-यदाने । भग्नाभग्नं कुटति सहसाप्राचिरं विश्वकर्म्मा तत्तेरण्यत्रविक्रमधु-ना वानरे नैवभग्नं ॥ २९६ ॥ इति दूताःसर्वे निष्क्रान्ताः ।

अथ भग्नदूतागमनं ।

दूतः । देवाकर्मय कर्कशेन कपिना केनापि केलीवने खेलद्वाजधिचालि-ताविटपिनःसाटोपमुत्पाटिताः । तत्रान्ये वनपालकाः सरभसं सर्वेपि निर्वापि-तास्तदार्त्ता कथनाय केवल महं दैवेन संरक्षितः ॥ २९७ ॥

इति श्रुत्वा प्रहितेन रक्षः सैन्येन समंयुद्धं कुर्व्वति हनूमति तद्वृत्तान्त मासाद्य रावणचेष्टा ।

सूत्र । इत्नीतिज्वलित क्रुधाकपिरिति व्रीड़ानमत्कन्धरो हेलोल्लङ्घित वाहिनी पतिरितिस्लाघा चलत्कुण्डलः । रामस्यायमितीर्षया कलुषितो लङ्का मुपेत्योद्भटे विक्रामत्यनिलात्मजे दशमुखः कां कां दशां नागतः ॥ २९८ ॥

अथान्तरे सीता हनुमतो रहस्यं त्रिजटयाकथिते रावणः ।

त्रिजटा । मुद्रामर्कट केन राम निकटा दागत्य दत्ता करे सीतायाइति सम्भ्रमा त्त्रिजटया प्रोक्तोऽथ लङ्केश्वरः । किं किं किं किमिति व्रुवन्निरनिशं सिंहासना दुत्थितैरक्षो मुख्यसुत क्षमेघवहिकपिं धर्त्तुं नियुक्तो हतः ॥ २९९ ॥

अथ रावणाज्ञया चलत्यक्षयकुमारे पारिपार्श्वक वाक्यं ।

प्रविशत्यक्षयकुमारः ।

पारिपार्श्वकः । प्राकार तोरणमयीं पुरमप्यलंघ्यां लङ्कामयं विगणति कोपि कपि प्रवीरः । तत्संमुखं प्रचलितः स्वयमक्षनामा नन्वेष राक्षसपतेः कुपितःकुमारः ॥ ३०० ॥ ततोऽनुमतासमरेऽक्षयकुमारोऽथापादितः ।

अथाक्षेपतिते रावणाज्ञया गच्छति शक्रजितिपारिपार्श्वक वाक्यं ।

इत्याकर्ण्य च दधिराज कुमारमक्षं रेवानरापसद कुत्रपलायितोसि । त्वां हन्तु मिच्छति दशानन शासनेन दर्पोद्धतो धृत धनुर्ननु मेघनादः ॥ ३१० ॥

हनूमन्तंप्रति शक्रजित् ।

शक्रजित् । रामस्यागमनं निवेद्य सुचिरादाश्वास्य सीतांततस्तन्नीमन्तम-

Digitized by Google

क्षितदाशरथेः प्रत्यायनायाददे। भङ्क्त्वाग्रोद्यानवनं निहत्यसहसाचार्यादिकान् राक्षसान्रक्षुं रावण मात्मबन्ध विषये सौम्येऽभवन्मारुतिः॥ २०२॥

अथ हनूमन्तं रावणः।

रेरेदूत किमेवमेव चरितं वारां निधिं दुस्तरं लङ्घित्वा जवजम्भुभिः परिवृतं भीमं तरङ्गैस्तरैः। आयातोसि विनारथं कथमिहप्रख्यापितः केनवा ब्रूहित्वं नहिवध्यएवनभयः किं नामधेयो भवान्॥ २०३॥

ततो हनूमान्।

श्रीरामेण सलक्ष्मणेन जयिना श्रीचित्रकुटे स्थितः सीतान्वेषण कार्य साधनविधौ प्रस्थापितोयत्नतः। लब्ध्वा चैववरं चिरात्पुरभिदः सर्वज्ञतामीप्सितं विद्धित्वं पवनात्मजो दशमुखश्रीगान् हनूमानहं॥ २०४॥

अपिच। हत्वावालि महाबलः कपिचमू मास्वास्य सुग्रीवकं राजानं हृतिमं सदाविजयिनं सख्युः सदानन्दनं। कृत्वा चैव विभेव दैवनिवहाख्यात्र्य चिन्ताश्रितः श्रीरामोजनकात्मजा हरणतःकाचोप मोराजते॥ २०५॥

रावण हनूमतोक्तिप्रत्युक्ती।

रेरेवानर कोभवानहमरे त्वत्प्रभुहन्ताहवे दूतोहं खरखण्डनस्य जगतां कोदण्डदीक्षा गुरोः यद्वेर्दण्ड कठोरताडनविधौ कोसौऽपि कूटाचलःकोमेरुः क्षय रावणोघ गजना कोटिस्तु कीटायते॥ २०६॥

रावणंप्रति हनूमान्।

रक्षोहं पवनात्मजो दशमुखत्वत्वापि कोटीश्वर त्वांजित्वा समरे प्रभोः

Digitized by Google

प्रणयिनीं सीतामानेतुं क्षमः। किन्तु प्रीतिमता पुराभगवता रामेण सुग्रीवतो दत्वा दक्षिणं पाणिना वसुमतीं त्वां हन्तुमुक्तं वचः॥ १०७॥

अपिच। रे रे रावण राक्षसाधम पशोर्मुखोसि मूढाधम गर्व बर्बर मुञ्च मुञ्च भ्रातिति प्रीत्याहितं ब्रूमहे। मुक्त्वा सेवय रामचन्द्र चरणौ दत्वा पुरोजानकीं तस्माद्राज्य मकण्टकं कुरुचिरं पुत्रेण पौत्रेणवा॥ १०८॥

आत्मानं परिरक्षितुं यदिभवान् पुत्रञ्च पौत्रादिकं भ्रातुर्वर्गं कुटुम्बकंपरिजनं चान्यत्तथा सैनिकं। राज्यञ्चापि महोदितं दशशिरः कांक्षस्यदः स्वेच्छया श्रीरामाय महात्मने विजयिने तद्दीयतां मैथिली॥ १०९॥

यावद्बाणशरव्रजेन पशुसिमुखं यावन्नवारां निधिर्बद्धो यावदियञ्च वानरचमूक्रान्ता न लङ्कापुरी। यावत्सोदर बन्धुपुत्र सुहृदां मृत्युं न चालोकसेतावद्राघव लोकनाथ दयिता सीतास्वयं दीयतां॥ ११०॥

अथवा किं बहुना।

तावल्लङ्केश्वरो राजा यावन्नायति राघवः। आयाते राघवे वीरे लङ्कालङ्केश्वरःकुतः॥ १११॥

आगत्य च विभीषणः।

अत्रावसरे क्रुद्धे रावणे विभीषण वाक्यं।

वैरूप्यमङ्गेषु कशानिपातो मौर्ख्यं तथाबन्धन सन्निवेशः। एतान् वधार्हान्हृदिबद्धवादी शास्त्रेषु दूतस्य वधोन्नदृष्टः॥ ११२॥

अपिच। कपीनां किलबालकूल्य मिदमेकं विभूषणं। तदस्य दीप्यतामाशु तेनदग्धेन गच्छतु॥ ११३॥

Digitized by Google

क्षेप्तुं तं जनितोद्यमः क्षितिभुजां वध्योऽन दूतो भवेदित्या कर्ण्यविभीषणस्य वचनं क्रुद्धस्तथा रावणः। बद्ध्वावालधिवल्लरीं बहुविधैर्वासोभि राज्यस्नुषै र्दत्वावह्नि मदीपयद्ध्वनुमतः कर्तुं विरूपंवपुः ॥ ३१४ ॥

रावण हनुमतो रक्षि प्रत्युक्ती।

अग्निःप्रज्वलितःसमादिशभृशं वर्षन्तुधाराधरावातो वाति नवास्यति ध्रुव ममी देवास्तवाज्ञावशगाः। इत्थंसुप्त यकोत्तरै र्हनुमतो लङ्कापतेर्मानसं दग्धं यादृश मङ्कमेवच तथा दग्धापि लङ्कापुरी ॥ ३१५ ॥

अत्रावसरे जनानां वितर्कः।

अग्निः किं वडवानलेनतरणेर्बिम्बेन किंस्वाविद्युन्मेघः किं चपलाङ्गनेव ग्रसिभृत्किंभाल नेत्रेणवा। कालः किं क्षयवह्निनेन्द्र धनुषाधाराधरः किं महाम्भेदः किं ध्रुवमङ्गुलेन सकपिः पुच्छेन खेराजते ॥ ३१६ ॥

अथ हनूमान्।

रामाग्रे नच लक्ष्मणस्य पुरतः क्षत्वा शरैराक्षसं सीता निस्तपसेपमाच हृदया चोर्य्येण नीतात्वया। प्रत्यक्षं तवदुर्मते वरगृहैः पूर्णाजनैरावृता स्वर्णप्राटिकरत्न मौक्तिक मयीलङ्कामया दह्यते ॥ ३१७ ॥

सूत्र। उत्क्रान्तसुखानां भयविह्वलानां जलंजलं व्याहरतां मुखेभ्यः। निर्मोक्ष्यवह्निर्हिगुरु प्रभावो ददाहलङ्कामनिवारितार्चिः ॥ ३१८ ॥

रावणः। शीघ्रं रक्षत वाजिवारणगृहं व्याघ्रागृहं स्त्रीगृहं रत्नागार धनागार मयं बलवता वातेन दीप्तोऽनलः। धूमव्याकुल नेत्रवक्त्रयुवती बालस्त्रियो ताडनात् क्रन्दद्बालक वृद्धभीत वनिता हाहारवः श्रूयते ॥ ३१९ ॥

सूत्र। श्रीलङ्कामवलोक्य घोरदहनैः संदह्यमानां भृशं ग्रीवाचेति वचांसि

Digitized by Google

सर्ववदनैस्तोयार्थि लङ्केश्वरः । अग्नेनीरधि रम्बुधिर्जलनिधिः पाथोनिधिः सम्भ्रमादम्भोधि र्जलधिः पयोधिरुदधिर्वारां निधिर्वारिधिः ॥ १२० ॥

रावणः । निकुम्भकुम्भोदर कुम्भकर्ण कुम्भेरलं केवल नामधेयैः । मन्दोदरी मन्दिर पावकोयं पानीय मानीय नकैर्विनीतः ॥ १२१ ॥

ततोशोकवने वायुपुत्रः सीतान्ति केऽब्रवीत् । लङ्काद्दग्धामया देविविदायो दीयतामिति ॥ १२२ ॥

सीता धूमशिखाग्नेोः कालस्याल वधूरिव । उदस्यन शिरोरत्नं विज्ञानं स्वामिनेददौ ॥ १२३ ॥

सीता । मनःशिलायास्तिलकं तथामेगण्डस्थले पाण्डितलेच घृतं । स्मरेति विज्ञानमथोतृतीयकं जीवाम्यहं राघव मासमेकं ॥ १२४ ॥

सूत्र । दग्धालङ्कामगच्छं जनकनृपसुतां तां समाभाष्यभूयो वायोः सूनुस्तरस्वीपुनरपिमिलितोजाम्ब वन्मुख्ययूथेः । तेभ्यःसर्व्वं निवेद्य प्रमुदितहृदयेस्तः समंसंनिवृत्तः सुग्रीव प्रेमपात्रं मधुवनमथ संरुध्य भोगंसचक्रे ॥ १२५ ॥

तैःपिबद्भिरभितो मधूदयं वारितो विनिहतो महाबलैः । रक्षकोदधिमुखोऽवधीरितः सप्लवङ्गपति सन्निधिं ययौ ॥ १२६ ॥

इति सर्वे निष्क्रान्ताः ।

इति पञ्चमोऽङ्कः ।

Digitized by Google

अथ षष्ठोऽङ्कः ॥

विंध्याचल वर्णनं ।

ततोवनपालैसहप्रविशति दधिमुखः । जयतिजयति देवः । इतिसुग्रीवं प्रणम्य ।

दधिमुखः । विंध्यं भूमिधरं तदन्तरवनं तद्वोरुसिंहाकुलं तत्राधिष्ठित देवतापरिकल्पितप्रीति दत्तं फलं । वैदेह्या मभितो विचिन्त्यहरयः सुग्रीवसंप्रेषिता दारोहन्तिविशन्ति यान्ति दधति ध्यायन्ति खादन्तिच ॥ २२७ ॥

हनूमदागमनं मजानन् सुग्रीवं प्रति रामः ।

मासमेकं गतोलक्ष्मां हनूमान्नविवर्त्तते । चिरंदूतेषु कल्यार्थं यदि वज्रो न विष्ठति ॥ २२८ ॥

अपिच । हे सुग्रीव हनूमतः कथमद्यो वार्त्तापि नासाद्यते दुर्गम्भोजलधिः पुरीचविषमा तस्मादिदं कल्प्यते । दुष्टैर्धर्म्म पराङ्मुखैः दंभमुखैः सार्द्धं विद्यासापतेः यातो वासविवासवायुतनयः कार्यानुरूपक्रियः ॥ २२९ ॥

अथ दधिमुखात् हनूमदागमनं श्रुत्वा श्रीरामंप्रति सुग्रीवः ।

यथा । कल्यस्मार्कं मधुवनमिहस्थाभुजा मेकभोग्यं भंक्त्वा भुंक्ते पवनतनय खेदसौ लब्धकार्य्यः । सत्यंप्रत्या गतइव तयोरित्थ मास्वाप भाजोल्लायातः स्मित स्निग्धविलोक्योत्तीर्ण हर्षो हनूमान् ॥ २३० ॥

प्रविशति हनूमन्तं ।

सूत्र । ततोमरुत्सुतवाक्यप्रेरणः प्रसन्नतारोधिप मण्डलाग्रगीः । वियुक्त रामातुर दृष्टिवीक्षितो वसन्तकालो हनुमानिवागतः ॥ २३१ ॥

Digitized by Google

अथ राम हनुमतो वक्तिप्रत्युक्ती।

हंहोमारुतनन्दनादिशठितो दृष्टात्वयाजानकी दृष्टा जीवतिजीवति प्रिय-तमा मांप्रोचते प्रोचते। मद्विच्छेद कृशा कृशा वदतिकिं हाराम हालक्ष्मणेत्ये-वं तत्प्रहितं किमस्ति सुतरां मल्लेख चूडामणिः॥ ३३२॥

इति प्रथमाभिज्ञानं चूडामणिं दर्शयति।

ततश्चूडामणिमासाद्य श्रीरामचेष्टा।

सूत्र। कण्ठेसंतनुते चिरमुरः पीठे निवेश्य प्रियासर्वाङ्गोल्लासभरं समाक-लयतिप्रेम्णाधिरंपृच्छति। स्वामिन्याः कुशलं तवेति पुरतः पर्य्य श्रुसंप्लुतं निष्पन्देक्षण वीक्षणंप्रकुरुते चूडामणिं राघवः॥ ३३३॥

ततःपुनर्हनूमान्। मनःशिलाया स्तिलकं स्मरगण्डस्थलेमम। संदृश्यजान-कीदत्तः स्वर्णात्काणीकृतःखगः॥ ३३४॥

इत्यभिज्ञानद्वयं दर्शयति।

तत आलिङ्गितु मुपक्रान्तं श्रीरामंप्रतिहनूमान्।

पीतेनाम्बुनिधि र्नरावणपुरी निःशेष चूर्णीकृतानागीतानिशिरांसि रा-क्षसपते र्नानायि सीतामया। व्यास्लेषार्पण पारितोषिकमहंनार्हामि वार्त्ता-हरः संजल्पत्य निलात्मजे च लपति व्रीडानतोराघवः॥ ३३५॥

रामः। अहो नविहितं किम्वा भवता राक्षसाहृताः। दग्धा लङ्कापुरी सर्वा सीतावार्ता समाहृता। हनू। त्वत्प्रतापानलेनैव नाथ श्रीरघुनन्दन। दग्धपुरैव लङ्केयं पश्चादङ्गिर्मयार्पितः॥ ३३६॥

Digitized by Google

रामः । अहोकिं नविहितं भवता । यदयं जङ्घितः समुद्र इत्युक्ते ।

हनूमान् । देवत्वत्प्रसन्नप्रताप तपने रत्नोनिधिः शोषितस्तेनेत्थं स्वयमेव शैव गतवान् जङ्घामलङ्घामहं । रत्नोनायक नागरीनयनजैर्नीरैरया पूरितस्तेत्सार्थो जलधिस्तदाममङ्घतास्याखेन किंवापरं ॥ २२७ ॥

अथोपविश्य राम हनुमतोरक्ति प्रत्युक्ती ।

क्वान्तेगीता वसति विपिने देव लङ्केशगुप्ते कीदृक्पत्या जलधि पिहित-स्तीर्यते दैवयोगात् । इत्याख्याते पवनतनये व्रीडविभ्रान्त नेत्रो हर्षव्रीडाऽऽभय चकितो विह्वलो रामचन्द्रः ॥ २२८ ॥

ततःप्राप्तचेतनेन रामेण कीदृग्सीतेति प्रत्ययार्थं पुनःपृष्टोहनूमान् ।

हनू । इन्दुर्विम्बहवाङ्गनेन दलिताद्दिर्मृगीलोचना पाश्वस्थे नवमेघविद्यु-न्मदलं श्यामेव हेमप्रभा । पार्श्वस्थं जलदेव कोकिल वधूकण्ठेष्विवप्रस्तुतंसीता-याः पुरतोऽथहन्त शिखिनां बर्हाःसगर्हाइव ॥ २२९ ॥

इदानीं कीदृगवस्थेति श्रीरामेण पुनः पृष्टो हनूमान् ।

हनू । कार्श्यं चेत्प्रतिपत्तिरत्र हिमनिधेः क्षूणाऽथचेत्पाण्डुना मीनाक्षीव मृणालिका नयनयोर्बाष्पः कियान् वारिधिः । सन्तापो यदि शीतलो ऽतएवऽऽ-स्याःस्थियद्दृश्यते रामत्वःस्मृतिमात्रमेवहृदयं त्वावण्य शेषं वपुः ॥ २३० ॥

अपिच । स्वभावादेवतस्वङ्गी त्वद्वियोगा द्विशेषतः । प्रतिपत्प्रतिपच्चन्द्र-विद्येव तनुतांगता ॥ २३१ ॥

Digitized by Google

अथ कथं समुद्र उत्तीर्ण इति प्रश्ने ।

हनू । शाखामृगस्य शाखायाः शाखां गन्तुं पराक्रमः । यत्नया खन्दितो ऽम्भोधिः प्रभावोऽयं तवप्रभो ॥ ३४२ ॥

अपिच । राम नाम तव ज्ञातु ऊक्ताः पामरा अपि तरन्ति भवाब्धिं । अङ्गुलीं भवरङ्गुलिमुद्रः किं विधिश्च मतरत्नाधिरब्धिं ॥ ३४३ ॥

रामः । चतुरस्रपुरीलङ्का सप्तप्राकार वेष्टिता । रघीनाथ चतुर्भिश्च रथ-नाथ त्रिकोटिभिः ॥ ३४४ ॥

त्रिकोटि शालासंयुक्ता नवकोटि सुरक्षया । कथं एषी त्वया दग्धा विद्य-माने दशानने ॥ ३४५ ॥

त्रिदशैरपि दुर्धर्षा लङ्कानाम महापुरी । कथं वीर त्वया दग्धा विद्यमाने दशानने ॥ ३४६ ॥

हनू । निश्वासेनैव सीताया राजन् कोपानलेन ते । दग्धा पुरैव रक्षेयं निमित्तमभवं त्वहं ॥ ३४७ ॥

रावण जयेभवतः कीदृक्षदवसाय इति प्रश्ने ।

हनू । रक्षस्तङ्कजकन्दरं बलभुजं वह्नानं दीप्तिभिः कंसूरोद्गमहं विलोक्य सहसादध्रेमनोऽब्धिसिंसुं । देव त्वत्कृपया विजृम्भितधिया किं किं भवेद्दुष्करं भर्तुःकर्म भटस्य नोचितमिति त्वद्धीमया रावणः ॥ ३४८ ॥

रामः । एकेनैवोपकारेण प्राणान्दास्यामहं बले । अनेनैवोपकारेण एहेव ऋणिनोवयं ॥ ३४९ ॥

Digitized by Google

हनूमान्। मद्विधा बहवो भृत्या स्तव तिष्ठन्ति राघव। त्वद्विधो गुणसम्पन्नः स्वामीनैवोपलभ्यते ॥ ३५० ॥

इति सर्वे निष्क्रान्ताः।

ततः ससमुद्र सङ्गारचनं।

अथ श्रीरामचन्द्रस्य सङ्गाप्रयाणं।

सूत्र। अथ विजयदशम्यामाश्विने शुक्लपक्षे दशमुख निधनाय प्रस्थितो रामचन्द्रः। द्विविदगयसहायैर्यूथनाथैस्तथान्यैः कपिभिरपरिमाणैर्व्याप्तदिक् चक्रवालः ॥ ३५१ ॥

उत्पाते। खगयूथभः किलकिला शब्दैर्दिशोनादयन् भङ्गम्भवस्त्र कानि धरणीं मुहुर्नयन् सर्वतः। प्रस्थाने रघुनन्दनस्य सततं सुग्रीव संपालितो वज्रासंमुख सुखचाल सहसा क्षुब्धः कपीनांचयः ॥ ३५२ ॥

क्षोभीगच्छति भूधरो विचलति क्षोभं प्रयात्यम्बुधिः कूर्माऽकुण्ठति संकुचत्यहिपतिर्दैवाधिप स्खल्यति। क्षेत्राणिर्जित वैरिवज्रारचिता रामेप्रयाणोन्मुखे गन्तुं खेनविभीषणोपिसभयः स्थानान्तरंवाञ्छति ॥ ३५३ ॥

ततः समुद्र तीरावस्थितो रामः स्वगतं।

पारेसिन्धुपुरी पुरी परिसरे प्राचीर मभ्रंलिहं सिंहद्वेषिबलं रिपुव्रजवजा स्तेऽभकर्णादयः। ग्राह्यीकाः सरिपु क्षतन्वयइव भ्रातासखा वानरो मद्वैधं रघु वंशकेशरियुवा क्रोदण्ड मुद्यच्छते ॥ ३५४ ॥

ततो हनूमान्। देवाज्ञापय किंकरोमि सहसा सङ्गामिद्वानये अम्बुधीय मिलोनये किमयवा वारांनिधिं शोषये। क्षेलोत्क्षेपित विंध्यमन्दरगिरि स्वर्भूभिकूटाचल क्षेपक्षोभितवज्रमानसलिलं बध्नामि वारांनिधिं ॥ ३५५ ॥

अथ समुद्रोत्तरतीरे लङ्कावृत्तान्तः ।

सूत्र । लङ्कास्थानतिवृद्धतापसभटा मानीय प्रभ्रंशतो लङ्केशेन विलोक्य वीरनगरीं लङ्कांसशङ्कामिव । ध्यानज्ञानपरायणा मुनिगणा देवं किमत्र श्रुतं येषां यद्धृदये स्फुरत्यपि वच स्तेनैव तत्कथ्यतां ॥ ३५६ ॥

रावणस्यमात्रा निकषया व्यसनाद्रावणो निवार्य्यतामित्युक्तोविभीषणः । लङ्कानाथपदंप्रणिपत्याह । राजन् सेयं राक्षस कालरात्रिः सीतापरित्यज्यतां । यस्यवानरमात्रेण पुरीयं व्याकुलीकृता । कस्तेन सहयुध्येत बुद्धिमान् राक्षसेश्वर ॥ ३५७ ॥

अपिच । त्यजप्रकोपं कुलकीर्त्तिनाशनं भजस्व रामं कुलकीर्त्ति वर्द्धनं । अलं विवादेन समोविधीयतां प्रदीयतां दाशरथाय मैथिली ॥ ३५८ ॥

लङ्कादग्धा वनंभग्नं लङ्घित्वाम्बुमहोदधिः । यत्कृतं रामदूतेन स रामः किं करिष्यति ॥ ३५९ ॥

नरावयोवा नमहोदरोवा नकुम्भकर्णोपि नचातिकायः । नचेन्द्रजिद्वाग्रहणं प्रसोढुं शक्तास्तुतं शक्रजितप्रभावं ॥ ३६० ॥

सुवर्णपुंखाः सुभृशं सुतीक्ष्णावज्रोपमा वायु समानवेगाः । यावन्नगृह्णन्ति शिरांसिबाणाः प्रदीयतां दाशरथायमैथिली ॥ ३६१ ॥

तत आगतः कुम्भकर्णतनूजो रावणंप्रेक्ष्यवदति ।

तथैतेनोद्धृत्यस्फटिकशिखरी सोपिविदधे समन्तादामूल त्रुटितवसुधाबन्ध विधुरः । अमुं येनाद्यापि त्रिपुरहर नृत्यव्यतिकरः पुरस्तादन्येषामपि शिखरिणा मुन्मथयति ॥ ३६२ ॥

Digitized by Google

रावणः। शूराः श्रोत्र पथेषु नः कृतिकृतिप्राप्तः पदं चक्रिरे तेषामेव विशंक्य चाल्य पदवीं जागर्त्ति लङ्काभटः। यद्दोर्मंडल चण्डपीडन वशान्निष्यन्दिरक्त-च्छटा ग्रह्वामङ्गुरयन्ति शस्त्ररभिरेरद्यापिधातुद्रवाः॥ ६६३॥

इन्द्रं माल्यधरं सहस्रकिरणं दारि प्रतीहारकं चन्द्रं छत्रधरं समीरवरुणौ सम्मार्ज्जयन्तौ गृहान्। पाशक्ये परिनिष्ठितं ऋतवहं किं मद्गृहे मेक्षसे रक्षोभक्ष मनुष्यमात्र वपुषं तंराघवं स्रोपिकिं॥ ६६४॥

विभीषणः। रक्षोसौ भुवनेषु विक्रमगणैः प्राप्तः प्रसिद्धिंगिरा मस्माभाग्य विपर्ययाद्यदि पुनर्देवो नजानाति तं। वन्दीवैष यशांसि गायति मरुद्यस्यै कवा-क्षातिश्रेणीभूत विशालतालविवरोद्गीर्णैः स्वरैः सप्तभिः॥ ६६५॥

अजनि रजनिनाथे गगडलं चण्डरश्मेर्धनु रुदयमदभ्रं विद्युती द्योत्सखाक्षि। अथ हविधिरिदानीं दृश्यते रामरूप प्रदिश जनकपुत्रीं मिथता सेतु-रानः॥ ६६६॥

यस्यैकः कपिशावकः समरतरङ्गं च मग्नोनिधिं दुर्भेदामपि देव दैत्य निवहैर्लङ्गापुरीं प्राविशत्। क्षिप्त्वातान् वनरक्षिणो जनकजां दृष्ट्वाच भंक्त्वावनं हत्वाद्यं प्रदहन् पुरीमथगतोरामः कथं मानवः॥ ६६७॥

गतायुषं त्वां विपरीतबुद्धिं निःसंशयं राक्षस लक्षयामि। यो मां हितं तथ्यमपिब्रुवन्तं नमन्य सेराक्षस वीरमध्ये॥ ६६८॥

सूत्र। अथचरणहतो दशाननेन प्रकृतिविपर्य्यय मस्यलक्षयित्वा। सपदि-उपरिहृत्य तं समंत्री परिकुपितो नभसा जगाम रामं॥ ६६९॥

गमनसमये पुनर्विभीषणः सानुनयं।

प्रगृह्य रत्ना नि विभूषणानि वासांसि दिव्यानि मणींश्चमुख्यान्। सीताच रामाय निवेद्य देवी वसाद्य रक्षोगणयातु यद्वा॥ ६७०॥

Digitized by Google

रावणः । जानामि सीता जनकप्रसूता जामातिरामो मधुसूदनस्य । यद्यच्च जानामि हि तेनवश्य तथापिसीतां न समर्पयामि ॥ ३७१ ।

सूत्र । ततश्चतुर्भिः सहमंत्रिभिर्युद्धेप्येत्यरक्षः कुलयूथकेतुः । उद्भागधानङ्ग-दवाम्बरेण विभीषणोराघव मध्यियाय ॥ ३७२ ॥ निष्क्रान्तो विभीषणः ।

पुनर्लङ्का समुद्रयोः कल्पनं ।

सूत्र । विभीषणे समायाते सूर्यकोटि समप्रभे । तदादौ रावणभ्रान्त्या भङ्गःकपिकुलेभवत् ॥ ३७३ ॥

हनूमतायं निर्णीतो रावणो न विभीषणः । रामचन्द्र पदद्वन्द्व कमलेभ्रम रायते ॥ ३७४ ॥

देवादिविलापानाममनं ।

देव दानव नभः पथेषु निखिलाः पक्षिप्रधानाचरा यद्यद्भविभीषणो दशमुखभ्राता पदे मंत्रिणः । यावत्तेन हरेर्भयादहरयं किं तावदीमद्दे क्षत्याक्षत्य विचारधैर्यनिपुण सच्चप्रसादं प्रभुः ॥ ३७५ ॥

अथ रामचन्द्रंप्रति हनूमान्निवेदयति ।

सत्यंदाशरथे विभीषण इति भ्रान्तोसि लङ्कापतेर्निद्राविस्मृतिमिश्रित-स्यचरमः श्रीकृष्णकर्णस्यव । दाक्षिण्याभ्युपलक्षितः पितृकुलापेक्षावलक्षा-श्रयोरक्षोलोक विलक्षणां कलयति प्रत्यक्ष लक्ष्मीमयं ॥ ३७६ ॥

अथ रामलक्ष्मणवेषधरौ प्रत्युक्ती ।

धर्मात्मा दशकन्धराद्विरभूत्सादर्यं रावणात् संभ्रान्तो भिनयेन किं नकुरुते सुग्रीवतदासिनः ॥

Digitized by Google

रक्षोराज सहोदरस्य निभृतारम्भोपि सम्भाव्यते किंकुर्मः शरणागतं रिपुमपि द्रक्ष्यन्ति नेक्ष्वाकवः ॥ ३७७ ॥

समागत्य श्रीरामंप्रति प्रति विभीषणः ।

भुक्त्वा दिग्वलयं दशास्यदमन त्वत्कीर्ति हंसीदिवं यातान्ब्रह्मनराशसङ्कुल बलात्तत्रैव गर्भिण्यभूत् । पश्य स्वर्गतरङ्गिणी परिसरे तुन्दावदातं तयामुक्तंभाति विग्राक्षमखद्रुमिदं प्रीतत्रिषेर्मंखडलं ॥ ३७८ ॥

वीर क्षीर समुद्रसान्द्रलहरीशावण्यलक्ष्मीमुष स्त्वत्कीर्त्ते स्तुषनांकचक्र-मलिनो घत्ते कथं चन्द्रमा । स्यादेवं त्वदरातिसौधशिखरप्रोद्भूत धूम्याङ्कुरमा-सक्तभ्रमणः पतेद्यदि पुनस्तस्याङ्गणायां मृगः ॥ ३७९ ॥

क्रोदण्डमण्डलविनिःसृतचण्डबाणनुङ्काण्डखण्डित दशाननबाहुदण्डः । आ-खण्डलारिगज खण्डनचन्द्रहासः श्रीजानकी परिवृढः सुदृढप्रतिज्ञः ॥ ३८० ॥

पातुं भीतिजगन्ति सन्ततमकूपारात्समभ्युद्धरन् धात्रीं कोलकलेवरो हरि रभूत्पोतेऽदंष्ट्रकुरात् । कूर्मः क्रन्दति नालति द्विरसनः पन्नस्ति दिग्दन्तिनो मेहः क्रोशति मेदिनी जपजति द्योगापि रोक्ष्यति ॥ ३८१ ॥

कूर्मः पादेऽस्य यष्टिं भुजगपति रसौभाजनं भूतधात्री तैलोत्पूराः समुद्राः कनकगिरिरयं दीप वर्त्ति प्रदीप्तः । व्यर्त्ति श्रद्धांशुरोचि र्गगनमचिनता कल्पकं दह्यमाना यत्नश्रेणोपतस्था व्यवति रघुपते त्वत्प्रतापप्रदीपः ॥ ३८२ ॥

कूर्मं क्षोभयितुं दिशःस्खलयितुं भेत्तुं च पृथ्वीधरानम्भोन्मूलयितुं तथादिन मणिं प्रक्षालितुं क्षेणुभिः । राक्षीरेष पुनःपुनस्तलवलत्क्षोणाक्षताडम्बरान्धर्षुं वीरवरूथिनी तवधराजेतुं परान्वाञ्छति ॥ ३८३ ॥

तुषाधारो धातावहति वसुधा पूर्णपदवीं पतीयः स्यात्सूर्यं कनकगिरिरीमा

Digitized by Google

नपत्निका । तुलादण्डः सत्यं यदिभवति दामोदरगदा तदाप्येषोऽदृष्ट्वा क्षतवपुः समूहं तुलयितुं ॥ ३८४ ॥

व्यर्थस्तोयदि नैवकुप्यसि मृषावाद्यं नचेन्मन्यसे यद्रूपोद्भूतवस्तु वर्णनविधौ-यत्नाः कवीनां गिरः । देव त्वत्तरणप्रतापदहनज्वालावली शोषिताः सर्वेवारि-धयस्तवारिवनिता नेत्राम्बुभिः पूरिताः ॥ ३८५ ॥

हनूमच्चरितं स्तौति ।

रथः क्षत्त्वेलोकोधनु रगपतिर्ज्या पक्षिपतिः शरोमाथीयोधः सरसिज-भवः सारथिरपि । शरः शैरि र्दैवत्रिपुरपुरदाहे परिकरो ज्वलज्ज्वालै र्लङ्का वतभसितभूता हनूमता ॥ ३८६ ॥

विभीषणंदृष्ट्वा सुग्रीवो लक्ष्मणमाह ।

यस्य न स्वजनेप्रीतिः का प्रीति रितरेजने । भक्षितव्योऽस्मि शैलेऽपि दूर-स्थोपि विभीषणः ॥ ३८७ ॥

तदन्ते विभीषणावस्था ।

दृष्ट्वावानरवाहिनी मणिभृताहङ्कार झङ्कारिणीं भङ्गावासविभीषणः क्षणमभूद्दुर्वारदोर्विक्रमः । पश्यन्दाशरथिं प्रमोदलहरी गम्भीरनुच्छ्रिभित क्षमःसम्भृतविक्रमेपि चलितुं स्थातुं नचायंक्षमः ॥ ३८८ ॥

तं दृष्ट्वारामः । दिग्धरं नेवसंधत्ते हिः स्थापयति नाश्रितान् । दिर्ह्दातिन चार्थिभ्यो रामोदिनैंवभाषते ॥ ३८९ ॥

विभीषणस्य हृदयं हनूमान् कथयति ।

सुग्रीवस्य श्रियं दृष्ट्वालक्ष्मणस्य च सेवनं । विभीषणस्य दोषेव मतिरायाति याति च ॥ ३९० ॥

Digitized by Google

ततः श्रीरामंप्रति सुग्रीवः।

त्वेलत्वंतवधिकं तव लङ्कानाथे विभीषणात्। हनूमतास्य राजन्न कथितः प्रभूदोगुणः॥ १९२॥

श्रीराम विभीषणयोरन्तिके प्रत्युक्ती।

अथे रक्षोराजानुज कुशलमद्यैव कुशलं यतोयोऽयाकीनं चरण कमलं दृक्षत्यमभूत्। किमुदेष्यं गुप्तात्पदकमलसेवैव विदितं भवानद्यैवाभून्निज नगर लङ्कापरिवृढः॥ १९३॥

तस्यातिभक्तिमधिगम्य विभीषणस्य सौमित्रिणा रजनिचारवचक्र राज्ञे। प्रत्तोऽभ्यषेचयदमुं प्रवरोरघूणां प्रायः प्रपन्नकरुणाविषया महन्तः॥ १९४॥

परसारं वानराः।

अथेवाय्य विभीषणस्य शरणापन्नस्य मूर्द्धागते हर्षादस्य ददात्ययं रघुपतिर्लङ्काधिपत्यश्रियं। यतोयेव भुजाविह प्रतिभुवो सुग्रीवराज्यार्पणे अथोऽस्य भयमानसं यदरितो सर्ववयं साक्षिणः॥ १९५॥

समुद्रं प्रति रामः।

त्वमसिकुलगुरुर्मे मुख्य वर्त्मानुराशे गिरसि विनिहितोऽयं भक्तियुतोऽञ्जलिस्ते। दशवदनकृता तेमा क्षुधा मे भुपेयादशमुखनिधनेन क्षीयतां मेऽक्षलङ्घः॥ १९६॥

अथप्रायोपविष्टे रामे मार्गमलभमाने समुद्रे लक्ष्मणंप्रति रामः।

याधिजादैन्यपराभवप्रलयगी नेक्ष्वाकुभिः शिक्षिता सेवासन्नमितः कदारघुकुले

मोलौनिचक्रोऽञ्जलिः । तत्सर्वं विहितं तथाप्युदधिना नवोपरोधःकृतः पाणिस्तं प्रतिसंप्रति प्रतिपदं प्रभुं धनुर्वाञ्छति ॥ ३९७ ॥

अथ सूर्योदये सूर्यसमुद्रयोरुक्ति प्रत्युक्ती ।

भोःसिन्धोभगवन्नमस्त्वलमिकिं श्रीरामभद्रानुगोदस्तस्त्रिभयेन किं तव-
मयं त्यक्तुनवस्त्वदुक्षाः । तस्येन्दुर्वदनेमाचसदनं तीयूषमाधारे बाढोकल्प-
तरु र्निर्मातविश्विश्रेवीषु हालाहलं ॥ ३९८ ॥

श्रीरामः सरोषं ।

आनयानय सौमित्रे शरान् कालानलोपमान् । समुद्रं शोषयिष्यामि
पादभ्यांयान्तुप्लवङ्गमाः ॥ ३९९ ॥

दम्भोलितीव्रै र्विशिखैरनेकैरम्भोनिधिं पांशुनिधिं करिष्ये । क्षणेन वि-
स्तीर्णमहीभूमयिष्ये भस्मीकरिष्ये मृगतृष्णयिष्ये ॥ ४०० ॥

सूत्र । श्रीरामचन्द्रे दशवक्त्रपुर्य्यामादाय पाथोनिधिवद्रकोपे । आग्नेय-
मस्त्रंप्रतिसंदधाने वेलागिरीन्द्रोचकितावभूतां ॥ ४०१ ॥

अनन्तरञ्च । दिशोधूमायन्ते ज्वलितमभवत्सागरजलं परित्रेसुर्नक्राः
स्फुटनमगमन् ग्रावसमयः । परित्यक्तोवाले रघुपतिवृढे नाथ सहसा दधन्मूर्तिं
सिन्धुर्जगतमखिनां प्रादुरभवत् ॥ ४०२ ॥

अथ समुद्रः सानुनयं ।

प्रशमयदहनतीव्रं शामितं ते शरौघः क्व मितमखिलाशंदेहकोपंजहीहि ।
नलनलरतलक्ष्मीवानरानीकशैलैर्विरचयसखिसेतुं सुखपारंप्रयाहि ॥ ४०३ ॥

Digitized by Google

सेतुबद्धारम्भे रामंप्रतिनलः ।

रागरत्नमञ्जुबन्धे चित्रकूटकपेटके । कौशल्याशुक्तिसंभूतं जानकी कण्ठभूषणं ॥ ४०४ ॥

सूत्र । उत्पाट्योत्पाट्य शैलानतिबहुलतलप्राप्तपातालमूलानुत्तुङ्गान्तुङ्गशृङ्गा नति कलितनभो मण्डलान् दिग्विकीर्णान् । दुर्धार्ष्यानाकलय्य प्रभृतिकपिभटास्तेसमानिन्युरन्तः सिन्धोसन्धायदोष्णा विरचयतिनलोनिर्भरं सेतुबन्धं ॥४०५॥

सेतुबन्ध समये श्रीरामं प्रति सुग्रीवः स्तौति ।

क्रमचरणः कपीन्द्रैर्नीयमानेनगेन्द्रे गिरिकुहर निवासा राघवत्प्रसादात् । मुखकुहि परिपेयां प्राप्यमन्दाकिनीं खेसवलितकरदण्डाः कुम्भिनोन्तःपिबन्ति ॥ ४०६ ॥

पवसि पाषाणेषु क्षिप्तेषु विभीषणः ।

येमज्जन्तिजले क्रियत्यपिचिरं ते प्रस्तरादक्षरे सिन्धोरुन्नतरन्ति राक्षस भयं सम्पादयन्तो भृशं । नैतेग्रावगुणा नवाधिगुणतो वागराजांगुणाः श्रीम द्रामयेयिथं हि मङ्गजाशक्तिः समग्रीक्षति ॥ ४०७ ॥

अथ समुद्रं प्रति सुग्रीवः ।

दुर्वृत्तसंगति रनर्थ परम्पराया हेतुः समां भवतिकिं वचनीयमत्र । चन्द्रे-श्वरोहरति दाशरथेः कलत्रं प्राप्नोति बन्धनमसौकि लसिन्धुराजः ॥ ४०८ ॥

खलः करोति दुर्वृत्तं नूनंफलति साधुषु । दशाननोहरेत्सीतां बन्धनं मादमेदधौ ॥ ४०९ ॥

Digitized by Google

ततः प्रविशति प्रहस्तः ।

समुद्र बन्धनं श्रुत्वा प्रहस्तः ।

विषमजलधिमध्ये सेतुबन्धं विधाय निशितशरनिपातैः रौद्ररेन्द्रं निहत्य।
यदिनयतिससीतां रामनामा तपस्वी मशकगलकरंध्रे हस्तियूथं प्रविष्टं ॥ ४१० ॥

अत्रावसरे रावणचेष्टा ।

सूत्र । आदीजज्ञास बऊविप्लवमाप मध्येसेतोः रुमाणिसमये सनिशाचरेन्द्रः ।
उद्भूतघर्म्मघन निर्झरसेव्यमान उत्पातवातहतपर्वतवच्चकम्पे । ४११ ॥

रावणः । पाषाणाः पयसिप्रमज्जवणधः स्तिष्ठन्ति सेतुंगताःश्रुत्वैवं वदतांदशा
ननधरःक्रुद्धःसमुद्रंप्रति । धिक्त्वां नामतवाम्बुधिः सलिलधिःपानीयधिस्तोय-
धिः पाथोधिर्जलधिः पयोधिरुदधिर्वारां निधिर्वारिधिः ॥ ४१२ ॥

श्रुत्वासागर बन्धनं दशशिराः सर्वैर्मुखैरुदात्तैः पुरुहूतिदार्त्तिकं सचकि-
तो भीत्याकुलः सभ्रमात् । वद्धः सत्यमपांनिधिः सलिलधिःक्षीरोदधिस्तोय-
धिः पाथोधिर्जलधिः पयोधिरुदधिर्वारां निधिर्वारिधिः ॥ ४१३ ॥

अपिच । पीतःत्वं कलशोद्भवेनमुनिना ध्वस्तोऽसिदेवासुरैराबद्धोऽसिच
रामनामहरिणा शाखामृगैर्लङ्घितः । नाम्नामारभटी तथैवभवतो लोकैरियं
धृयते पाथोधिर्जलधिः पयोधिरुदधिर्वारां निधिर्वारिधिः ॥ ४१४ ॥

सेतुबन्धदृष्ट्वा लङ्कागुर्वां वृत्तान्तः ।

सूत्र । राक्षसपुत्रस्त्वेकः कपिकटकरक्षामणिरसौ समुद्य लाङ्गूलखड्गमव-
धिरुद्यतनः । पुनः प्रत्यायास्यत्यहह कपिनाथे प्रचलिते वधः प्रेतपुरे भैर्भवच
कितलङ्कापुरजनाः ॥ ४१५ ॥

अष्टादशमहापद्म सेनाध्यक्षाधि पालिता । सारावलमुखेन सेतुनागमनु
गुप्तये ॥ ४१६ ॥

Digitized by Google

लङ्कायां मध्यिगर्ज्जिता पवभुजामाकर्ण्य कोलाहलान्‌ कोलान्‌ विदधुः प्लवङ्गमभटा युद्धोद्भटाटोपिनः । भोभोक्रम्भनिकुम्भ शुम्भमथुकाः सज्जाभवध्वंभृशं निर्गच्छन्त्विति निर्भरं सनभवद्भ्रूक्षेपरस्योत्कयः ॥ ४१७ ॥

कृतकलकलशब्दं त्रासिताशेषलोकं प्लवगनृपतिसैन्यं सेतुमातेनभीत्या । मुदितविपिनदुर्गं पर्वतेरसौ सुवेलेग्रिविरमत्त लङ्कानाथ नाथाय रामः॥४१८॥

सूत्र । आयातौशुकसारणौ दशमुखप्रख्यापितौ दौचरौदेहं वानरमाश्रितौ चकटकं संख्यातुमभ्युद्यतौ । विज्ञायाथ विभीषणे न यमितौ मुक्तौचतेनात्मनं रामेण प्रभुना विलोक्य कटकं रामाज्ञयातौगतौ ॥ ४१९ ॥

अथ लङ्कायां पराक्रत्यगतौ शुकसारणौ रावणाय निवेदयतः ।

